प्रवेश सं० ४५८६४ | विषय: वेद | क्रम सं० ७

ग्रन्थकार

नाम रुद्री

पत्र सं० १-२२

श्लोक सं०

अक्षर सं० (पंक्तौ) २७ | पंक्ति सं० (पृष्ठे) ७

लिपि: दे० ना० | आधार: कागज

आकार: ८-१" x ४"

संवत् १९२९

000852

आ० ६६५.

वि० विवरणम्

पी० एस० यू० पी०—७७ एस० सी० ई०—१६४१—५० ०००

Indira Gandhi National Centre for the Arts

४१८८

मथुरानाथशर्मणः
पुस्तकमिदम्॥

Indira Gandhi National
Centre for the Arts

रुद्रि
॥ २॥

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीसदाशिवाय नमः ॥ कर्मपात्रं
कर्तव्यं ॥ भूरसीति भूमिशोधनम् ॥ स्योना पृथिवीत्यासनम् ॥ ॐ अद्येऽमुकगोत्रस्या
ऽमुकशर्मणः शिवापरिशिव प्रीतये रुद्रिपाठ ॥ कर्मणो निर्विघ्नपरिसमाप्
त्यर्थं गणेशपूजार्थं तथा वैदिकोक्तमंत्र रुद्रीपाठकर्म कर्तुं नानानामगो
त्राणां नानानामशर्मणां ब्राह्मणानामभिष्वनेन पुष्पाक्षतताम्बूलवासोभिस्त्वा
महं वृणे ॥ ततो वृतास्म इति ब्राह्मणावरणम् ॥ अथ दीपगणेशपूजयेत् ॥
अथ कलशस्थापनम् ॥ ॐ अद्येत्यादि अमुकगोत्रस्यामुकशर्मणः सपरि
वारस्याऽयुरारोग्यमैश्वर्याऽनन्तरोत्तरहर्षविजयदारिद्र्यदुःखशमन सर्वारि
ष्ट शान्तिपूर्वक यथोक्तफलप्राप्त्यर्थं श्रीरुद्राध्यायस्य परमेष्ठि ऋषिः

रामः
॥ २॥

यो सावादित्ये पुरुषः स एव रुद्रो देवता गायत्र्यनुष्टुप्पंक्तिजगत्यष्टुछंदांसि
अच्छिन्न जलधाराशिवोपरि पञ्चामृत स्नानमात्र रुद्रीयषडङ्गमंत्रैरभिषेक
कलशारक्षापूजनमहं करिष्ये ॥ भूरसीति भूमिशोधनम् ॥ ॐ धान्यमसीति धा
न्यस्थाप्य ॥ ॐ आजिघ्र कलशमिति तदुपरि कलशं स्थापयेत् ॥ वरुणस्योत्त
म्भनमिति निर्मलतीर्थादि जलं प्रक्षिप्य ॥ या ओषधीति सर्वौषधिं प्रक्षिप्य ॥
या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ॥ मनैनु बभ्रूणामहं शतं धामानि
सप्त च ॥ ॐ हिरण्यगर्भः समिति पंचरत्नानि ॥ ॐ याः फलिनीरिति फलम् ॥
ॐ ओषधयः समिति यवान् ॥ ओषधयः सम्वदन्ते सोमेन सह राज्ञा ॥ यस्मै
कृणोति ब्राह्मणस्तं राजन्पारयामसि ॥ ॐ गंधद्वारामिति गन्धम् ॥

Indira Gandhi National
Centre for the Arts

रुद्रि
२

ॐ काण्डात्काण्डात्प्ररोहन्तीति दूर्वाः ॐ स्योना पृथिवीति पञ्च मृत्तिकाः ॐ अश्वत्थे
वो इति पञ्चपल्लवान् ॐ हिरण्यगर्भ इति वस्त्रयुग्मेन कलशं वेष्टयित्वा ॐ अग्निर्ज्योति
रिति आज्यपत्रं वैस्तान् यजमानः आयु ॐ तत्त्वायामीति वरुणमावाह्य कलश
पूजयेत् ततः कलशे गंगाद्याः सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः
आयान्तु यजमानस्य दुरितक्षयकारकाः इति मन्त्रेणावाहयेत् ॐ कलशस्य
मुखे विष्णुः कण्ठे रुद्रः समाश्रितः मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः
स्मृताः कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ऋग्वेदोऽथ यजुर्वेदः सामवे रामः
दोऽप्यथर्वणः अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ततः कलशस्कन्धे २
गणेशाद्याः पूजयेत् ॐ अद्येत्यादि रुद्राभिषेककर्मणो निर्विघ्न

परिसमाप्त्यर्थं रुद्रिपाठकर्माङ्गतया गणेशरक्षापूजनमहं करिष्ये इति
संकल्प्य गणानां त्वेति गणपतिं पूजयेत् अथ रक्षाबन्धन पूजा रक्षोहणम्
वलगहनं वैष्णवीमिदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो नि
चखानेदमहं तं वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहं तं व
लगमुत्किरामि स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा स
र्वराडस्यमित्रहा रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वो व
लगहनोऽवनयामि वैष्णवान् रक्षोहणो वो वलगहनोऽवस्तृणामि वैष्णवान् र
क्षोहणौ वां वलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां वलगहनौ पर्यूहा
मि वैष्णवी वैष्णवमसि वैष्णवा स्थ इत्यभिमन्त्रैः पूजयेत् ततः कलशस्कन्धे प्र

रुद्र
३

देवी गणपति सूर्य्य देवी शिव विष्णून् विनायक दुर्गा वायव्या काश्यपिनी कुमा
रान् सूर्य्य सोम भौम बुध बृहस्पति शुक्र शनैश्चर राहु केतून् इन्द्र सोमास्कन्द रु
द्र ब्रह्मेन्द्र यम काल चित्रगुप्ताख्यान् आग्न्यापो भूविष्णुरिन्द्रेन्द्राणी प्रजापति सर्प
ब्रह्माख्यान् इन्द्राग्नि यम निरृति वरुण वायु सोम ईशानि ब्रह्मानन्ताख्यान् ध्रु
वाध्रुव कम सूत्र धात्रादि ह्रद यादित्यान् वीरभद्र एकादश रुद्रान् गौर्य्यादि षो
डस मातृः आवाहादि सप्त मरुतो विनायक ब्रह्मादि विष्णु रुद्रादि कीर्त्तन पतीन्
यथा मिलितोपचारैः पूजयेत् अथ ध्यानम् ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं ... रुद्र ३
त्र्यक्षं पञ्चवक्त्रं ... त्रिलोचनं चतुर्बाहुं सर्वाभरण भूषितम् नमः शम्भवा
य इति जल स्नानम् तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचो

नमस्तिरुद्र

दयात् अथावाहनमंत्रः आवाहनं महादेव क्रियते तव तुष्टये आगमने
न देवेश मम शान्ति प्रदो भव अथासन मंत्रः यात विष्टरं विष्टरे सौव मयाहृ
यदेव प्रभो प्रीत्यर्थं तव देवेश वरदो भव मे सदा अथ पाद्य मंत्रः पाद्यं शुभम् मयाद
त्तं ते पाद्यं पुष्प गन्ध समन्वितम् गृहाण देवदेवेश प्रसन्नो वरदो भव अथार्घ
मंत्रः शिवनयवृता अर्घोसि त्वमुमाकान्त वाद्यैरणानेन देवप्रभो गृहाणत्वं मया
दत्तं प्रसन्नो भव शंकर अथाचमनीयमंत्रः आचमनीय मयादत्तं तव ... अर्घनौ
येन गृहाण परमेशान तुष्टो भव ममाद्य वै अथ स्नानीयमंत्रः असौयः स्नानीय
त्वमहादेव दीयते तवतुष्टये मयादत्तं हि देवेश गृहाण परमेश्वर पुनराचम
यमंत्रः असौया पुनराचमनीय व दीयते तव तुष्टये गृहाण देव देवेश प्र

Indira Gandhi National
Centre for the Arts

रुद्रि शान्तो भव वेश्वभो ॥ अथ यज्ञोपवीतमंत्रः ॥ नमोस्तु ॥ यज्ञोपवीतं सौवर्णं
मया दत्तं वरांकर ॥ गृहाण परमानन्द तुष्टिदो भव शंकर ॥ अथ वस्त्रमंत्रः
४ ॥ युवासु ॥ एतद्वासो मया दत्तं सोत्तरीयं सुशोभनम् ॥ गृहाण त्वं सुरश्रेष्ठ
मम आयुःप्रदो भव ॥ अथ चन्दनमंत्रः ॥ त्र्यम्बकं ॥ सुगन्धं चन्दनं देव मया
दत्तं च वेश्वभो ॥ भक्त्या परमया शंभो सुगन्धं कुंकुमं विभो ॥ अथ पुष्पमंत्रः ॥
यानि पुष्प ॥ नृसुदर्वं शंभो मया दत्तं सुशोभनम् ॥ गृहाण देवदेवेश मम का
न्तिप्रदो भव ॥ अथाक्षतामंत्रः ॥ परिते ॥ अक्षतान्मया देव दीयते तव शान्त एमः
ये ॥ अक्षतानां प्रदानेन मम शान्तिप्रदो भव ॥ अथ धूपमंत्रः ॥ अवतत्यधनुः ४
धूपं विशिष्टं परमं सर्वौषधिविजृम्भितम् ॥ गृहाण परमेशान मम शा

न्त्यर्थमेव च ॥ अथ दीपमंत्रः ॥ नमस्ते ॥ दीपावलि मया दत्तं गृहाण परमेश्व
र ॥ आरार्तिकप्रदानेन मम तेजःप्रदो भव ॥ अथ नैवेद्यमंत्रः ॥ मानः ॥ फलपक्वा
न्न दिनैवेद्यं ताम्बूलादिक्रमेण च ॥ गृहाण त्वं हि देवेश मम भोगार्थमेव च ॥ ॐ
भूर्भुवः स्वः पूजां विसर्ज्जयेत् ॥ अथ पञ्चामृतस्नानम् ॥ आप्यायस्वेति गो
तम ऋषिः पयो देवता गायत्री छन्दो ॐ वंक्रेईशानाय क्षीरस्नाने विनियोगः ॥ प
यः पृथिव्यामप्यऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ॥ पयस्वतीः प्रदिशः
सन्तु मह्यम् ॥ गोक्षीरधाम देवेश गोक्षीरेण मया कृतम् ॥ स्नापनं देवदे
वेश गृहाण परमेश्वर ॥ ततः क्षीरस्नानानन्तरं शुद्धोदकस्नानम् ॥ आपो
स्वऽ अस्मान्नित्यस्य प्रजापति ऋषिः त्रिष्टुप् छन्द आपो देवता शुद्धोद

अं४

Indira Gandhi National Centre for the Arts

रुद्र ५ कस्नाने विनियोगः आपो ऽस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पु
नन्तु विश्वं हि रिप्रं प्रवहन्ति देवी रुदिदाभ्यः शुचिरापूत एमि दीक्षा
तपसोस्तनूरसि तां त्वा शिवां शग्मां परिदधे भद्रं वर्णं पुष्यन् पुनःपू
जां कृत्वा भूर्भुवः स्वरिति पूजां विसर्जयेत् ओं दधिक्राव्णो इति वामदेव ऋषि
र्दधिर्देवता ऽनुष्टुप्छन्दः पूर्ववक्त्रे तत्पुरुषाय दधिस्नाने विनियोगः दधिक्रा
व्णो ऽअकारिषं जिष्णोरश्वस्य वाजिनः सुरभि नो मुखा करत्प्र ण आयूंषि
तारिषत् दध्ना त्वं महादेव स्नापनं क्रियते मया गृहाण त्वं मया दत्तं सुप्र रुद्र ५
सन्नो भवाव्यये पुनःपञ्चोपचारादि ओं घृतं मिमिक्षे इति गृत्समद ऋषिस्त्रिष्टुप्
छन्दो घृतं देवता पश्चिमवक्त्रे सद्योजाताय घृतस्नाने विनियोगः ओं घृतं मिमिक्षे

घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम अनुष्वधमावह मादयस्व स्वा
हाकृतं वृषभ वक्षि हव्यम् सर्पिषा च महादेव स्नापनं क्रियते मया गृहाण श्रद्ध
या दत्तं तव प्रीत्यर्थमेव च पुनः पञ्चोपचारादि ओं मधुवाता इति गोतम ऋषिर्मधु
देवता गायत्री छन्दो दक्षिणवक्त्रे अघोराय मधुस्नाने विनियोगः ओं मधुवाता ऽ
ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः इदं मधु मया दत्तं तव तुष्ट्य
र्थमेव च गृहाण त्वं हि देवेश मम सौख्यं प्रदो भव पुनः पञ्चोपचारादि ओं
अपां रसमित्यस्य बृहस्पति ऋषिरनुष्टुप्छन्दो शर्करा देवता उत्तरव
क्त्रे वामदेवाय शर्करास्नाने विनियोगः ओं अपां रसमुद्वयसं सूर्ये सन्तं
समाहितम् अपां रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतो

Indira Gandhi National
Centre for the Arts

रुद्र ८ सीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ सिंहया सहदेवे
श स्नापनं क्रियते मया ॥ गङ्गाम्भसा ... ग्रहानीतो भवत्प्रभो ॥ ततः पञ्चोपचा
रादि ॥ एवं पञ्चामृतेनैव स्नापनीयो वृषध्वजः ॥ उपचारं षोडशकं ततः कुर्या
द् बुद्धिमान् ॥ षडङ्गमन्त्राणि च श्रीमहारुद्रोपरि क्षिप्तजलधारयाभिषिञ्चे
दिति ॥ ॐ गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं
हवामहे निधीनां त्वा निधिपतिं हवामहे वसो मम ॥ आहमजानि गर्भधमा
त्वमजासि गर्भधम् ॥ १ ॥ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ॥ बृहत्युष्णिहा रामः
ककुप्सूचीभिः शम्यन्तु त्वा ॥ २ ॥ सहस्तोमाः सहछन्दस आवृतः सहप्र ८
मा ऋषयः सप्त दैव्याः ॥ पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो

नरश्मीन् ॥ ३ ॥ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ॥ दूरङ्गमं ज्यो
तिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १ ॥ येन कर्माण्यपसो मनीषिणो
यज्ञे कृण्वन्ति विदथेषु धीराः ॥ यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवस
ङ्कल्पमस्तु ॥ २ ॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ॥ यस्मा
न्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३ ॥ येनेदं भूतं
भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ॥ येन यज्ञस्तायते सप्तहोता तन्मे म
नः शिवसङ्कल्पमस्तु ॥ ४ ॥ यस्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता
रथनाभाविवाराः ॥ यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्क
ल्पमस्तु ॥ ५ ॥ सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव

Indira Gandhi National
Centre for the Arts

हृदि ७

हृत्प्रतिष्ठं यदजिरं ज्जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ६ ॥ ॐ हृदयाय नमः
॥ सहस्रशीर्षा पूरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठ
द्दशाङ्गुलम् ॥ १ ॥ पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्वस्येशानो
यदन्नेनातिरोहति ॥ २ ॥ एतावानस्य महिमातो ज्यायाँश्च पूरुषः ॥ पादो
ऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥ त्रिपादूर्ध्व उदैत्पुरुषः पादो
ऽस्येहाभवत्पुनः ॥ ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥ ततो
विराडजायत विराजो अधि पूरुषः स जातो अत्यरिच्यत पश्चाद्भूमिमथो पु
रः ॥ ५ ॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ॥ पशूꣳस्ताꣳश्चक्रे वाय
व्यानारण्या ग्राम्याश्च ये ॥ ६ ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञि

रामः ७

रे ॥ छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥ तस्मादश्वा अज
ायन्त ये के चोभयादतः ॥ गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ॥ तेन देवा अयजन्त साध्या
ऋषयश्च ये ॥ ९ ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥ मुखं किमस्या
सीत्किं बाहू किमूरू पादा उच्येते ॥ १० ॥ ब्राह्मणोऽस्य मुखमासीद्बाहू राज
न्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत ॥ ११ ॥ चन्द्रमा मन
सो जातश्चक्षोः सूर्यो अजायत ॥ श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजा
यत ॥ १२ ॥ नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ॥ पद्भ्यां भूमिर्दिशः
श्रोत्रात्तथा लोकाꣳ अकल्पयन् ॥ १३ ॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत

Indira Gandhi National
Centre for the Arts

न्वेत ॥ वसन्तोऽस्यासीदाज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥ १४ ॥ सप्तास्यास
रुद्रि न्परिधयस्त्रिः सप्त समिधः कृताः देवा यद्यज्ञन्तन्वाना ऽअबध्नन्पुरुषम्प
८ शुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ॥ ते ह
नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥ ॐ भूर्भुवः स्वः शिरसे
स्वाहा ॥ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ॥ तस्य
त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥ वेदाहमेतम्पुरुष
म्महान्तमादित्यवर्णन्तमसः परस्तात् ॥ तमेव विदित्वाति मृत्युमेति नान्यः प रामः
न्था विद्यतेऽयनाय ॥ १८ ॥ प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा विजाय ८
ते ॥ तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥ यो

देवेभ्यऽआतपति यो देवानाम्पुरोहितः ॥ पूर्वो यो देवेभ्यो जातो नमो रुचा
य ब्राह्मये ॥ २० ॥ रुचम्ब्राह्मञ्जनयन्तो देवाऽअग्रे तदब्रुवन् ॥ यस्त्वैवम्ब्राह्म
णो विद्यात्तस्य देवाऽअसन्वशे ॥ २१ ॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे
पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाण सर्
र्वलोकम्मऽइषाण ॥ २२ ॥ ॐ भूर्भुवः स्वः शिखायै वषट् ॥ हरिः ॐ आशुः शि
शानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनेनानि
मिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ॥ तदिन्द्रेण जयत तत्स
हध्वं युधो नरऽइषुहस्तेन वृष्णा ॥ २ ॥ सऽइषुहस्तैः स निषङ्गिभिर्वशी स
स्रष्टा स युधऽइन्द्रो गणेन ॥ संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा

३ सङ्क्रन्दनोऽनिमिषऽएकवीरः शतं सेनाऽअजयत्साकमिन्द्रः ॥ १

Indira Gandhi National
Centre for the Arts

हृ॰दि॰ प्रतिहिताभिरस्ता ३ बृहस्पते परि दीया रथेन रक्षोहामित्राँ २ऽ अपबा
९ धमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्
४ बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभिवी
रो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ५ गोत्रभिदं गोविदं
वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा । इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ
सखायो अनु सꣳ रभध्वम् ६ अभि गोत्राणि सहसा गाहमानोऽदयो वी
रः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु राम:
प्र युत्सु ७ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देव ९
सेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ८ इन्द्रस्य वृष्णो

वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध उग्रम् । महामनसां भुवनच्य
वानां घोषो देवानां जयतामुदस्थात् ९ उद्धर्षय मघवन्नायुधान्युत्सत्वना
मामकानां मनाꣳसि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु
घोषाः १० अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु
अस्माकं वीरा उत्तरे भवन्त्वस्माँ २ऽ उ देवा अवता हवेषु ११ अमी
षां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि । अभि प्रेहि निर्दह हृत्सु
शोकैरन्धेनामित्रास्तमसा सचन्ताम् १२ अवसृष्टा परा पत शरव्ये ब्रह्म
संशिते । गच्छामित्रान्प्रपद्यस्व मामीषां कं चनोच्छिषः १३ प्रेता जयता
नर इन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ १४

Indira Gandhi National
Centre for the Arts

हृद्रि
१०

असौयासेनामरुतःपरेषामभ्यैतिन ओजसास्पर्द्धमाना॥ तांगूहततमसा
पव्रतेनयथामीऽअन्योऽअन्यन्नजानन् १५ यत्रबाणाःसम्पतन्तिकुमा
राविशिखाऽइव तन्नऽइन्द्रोबृहस्पतिरदितिःशर्मयच्छतुविश्वाहाशर्म
यच्छतु १६ मर्माणितेवर्मणाछादयामिसोमस्त्वाराजामृतेनानुवस्ताम्
॥ उरोर्वरीयोवरुणस्तेकृणोतुजयन्तंत्वानुदेवामदन्तु १७ ॐभूर्भुवः
स्वःकावषायहूं॥ हरिॐ विभ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्दधद्यज्ञपताववि
हुतम् वातजूतोयोऽअभिरक्षतित्मनाप्रजाःपुपोषपुरुधाविराजति १ उदुत्यं शमः
जातवेदसन्देवंवहन्तिकेतवः दृशेविश्वायसूर्य्यम् २ येनापावकचक्षसा १०
साभुरण्यन्तंजनाँ२ऽअनु त्वंवरुणपश्यसि ३ दैव्यावध्वर्यूऽआ

गतंरथेनसूर्य्यत्वचा मध्वायज्ञंसमञ्जाथे तम्प्रत्नथायंवेनश्चित्रन्देवाना
म् ४ आनऽइडाभिर्विदथेसुशस्तिविश्वानरःसवितादेवऽएतु अपियथायु
वानोमत्सथानोविश्वञ्जगदभिपित्वेमनीषा ५ यदद्यकच्चवृत्रहन्नुदगाऽअ
भिसूर्य्यसर्वन्तदिन्द्रतेवसे तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य्यविश्वमा
भासिरोचनम् ६ तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मध्याकर्त्तोर्विततंसं
जभार यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै ७ तन्मि
त्रस्यवरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्योरुपस्थे अनन्तमन्यद्रुशदस्यपा
जःकृष्णमन्यद्धरितःसम्भरन्ति ८ बण्महाँ२ऽअसिसूर्य्यबडादित्यमहाँ
२ऽअसि महस्तेसतोमहिमापनस्यतेऽद्धादेवमहाँ२ऽअसि ९ इदूसूर्य्य

Indira Gandhi National
Centre for the Arts

रु॰द्रि
॥११॥

अवसा महाँ २ असि सत्रा देव महाँ २ असि ॥ मह्ना देवानामसुर्य्यः पुरो
हितो विभुज्योतिरदाभ्यम् ॥१०॥ आयन्न इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत ॥ वे
सूनि जाते जनमान ओजसा प्रति भागन्न दीधिम ॥११॥ अद्या देवा उदिता सू
र्य्यस्य निरंहसः पिपृता निरवद्यात् ॥ तन्नो मित्रो वरुणो मामहन्तामदितिः सि
न्धुः पृथिवी उत द्यौः ॥१२॥ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं म
र्त्यञ्च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१३॥ ॐ भूर्भु
वः स्वः ॥ नमस्ते यार्येवो यदु ॥ हरिः ॐ ॥ नमस्ते रुद्र मन्यव उतो त इषवे नमः ॥ रामः
बाहुभ्यामुत ते नमः ॥१॥ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ॥ तया न ११
स्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥२॥ यामिषुङ्गिरिशन्त हस्ते बि

भर्ष्यस्तवे ॥ शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥३॥ शिवेन वच
सा त्वा गिरिशाच्छा वदामसि ॥ यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् ॥४॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ॥ अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च
यातुधान्यो धराचीः परासुव ॥५॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुम
ङ्गलः ॥ ये चैनं रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषां हेड ईमहे ॥६॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः ॥ उतैनं गोपा अदृशन्नदृश्र
न्नुदहार्य्यः स दृष्टो मृडयाति नः ॥७॥ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मी
ढुषे ॥ अथो ये अस्य सत्वानोऽहन्तेभ्योऽकरन्नमः ॥८॥ प्रमुञ्च धन्वनस्त्वमुभ
योरार्त्न्योर्ज्याम् ॥ याश्च ते हस्त इषवः परा ता भगवो वप ॥९॥ विज्यन्धनुः

रुद्र कपर्दिनो विशल्यो बाणवाँऽउत । अनेशन्नस्य याऽइषवऽआभुरस्य नि
१२ षङ्गधिः ॥ १० ॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्वतस्त्व
मयक्ष्मया परि भुज ॥ ११ ॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो
यऽइषुधिस्तवारेऽअस्मन्निधेहि तम् ॥ १२ ॥ अवतत्य धनुष्ट्वं सहस्राक्ष
शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥ नमस्तऽआ
युधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ १४ ॥
मा नो महान्तमुत मा नोऽअर्भकं मा नऽउक्षन्तमुत मा नऽउक्षितम् । मा नो रामः
वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥ मा नस्तोके त १२
नये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः । मा नो वीरान्रुद्र भामि

नो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ १६ ॥ ॐ भूर्भुवः स्वः अस्त्राय
फट् । पुनः नमस्ते रुद्र ॥ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये न
मो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमो नमः शष्पिञ्जराय त्विषीमते
पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमो बभ्लु
शाय ॥ १७ ॥ नमो बभ्लुशाय व्याधिनेऽन्नानाम्पतये नमो नमो भवस्य हेत्यै जगतां
म्पतये नमो नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमो नमः सूतायाहन्त्यै व
नानाम्पतये नमो नमो रोहिताय ॥ १८ ॥ नमो रोहिताय स्थपतये वृक्षाणाम्पत
ये नमो नमो भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमो नमो मन्त्रिणे वाणि
जाय कक्षाणाम्पतये नमो नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमो न

Indira Gandhi National
Centre for the Arts

रुद्रि मः कृत्स्नायतया १९ नमः कृत्स्नायतयाधावते सत्वनाम्पतये नमो
१२ नमः सहमानाय निव्याधिन ऽआव्याधिनीनाम्पतये नमो नमो निषङ्गिणे क
कुभाय स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमो नमो व
ञ्चते २० नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्गिण ऽइषु
धिमते तस्कराणाम्पतये नमो नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णताम्पतये न
मो नमः सिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः २१ नम ऽउष्णीषिणे
गिरिचराय कुलुञ्चानाम्पतये नमो नम ऽइषुमद्भ्यो धन्वायिभ्यश्च वो नमो न रामः
म ऽआतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम ऽआयच्छद्भ्योऽस्यद्भ्यश्च वो न १२
मो नमो विसृजद्भ्यः २२ नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो
द्भ्य

जाग्रद्भ्यश्च वो नमो नमः शयानेभ्य ऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो
धावद्भ्यश्च वो नमो नमः सभाभ्यः २३ नमः सभाभ्यः सभापतिभ्यश्च वो नमो न
मः अश्वेभ्यो अश्वपतिभ्यश्च वो नमो नम ऽआव्याधिनीभ्यो विविध्यन्तीभ्यश्च
वो नमो नम ऽउगणाभ्यस्तृंहतीभ्यश्च वो नमो नमो गणेभ्यः २४ नमो ग
णेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृ
त्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो
नमः सेनाभ्यः २५ नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो ऽअर
थेभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भ
केभ्यश्च वो नमः २६ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुला

Indira Gandhi National
Centre for the Arts

रुद्रि
१४ लेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः
श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः ॥ २७ ॥ नमः श्वभ्यः श्वपतिभ्य
श्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्री
वाय च शितिकण्ठाय च नमः कपर्दिने ॥ २८ ॥ नमः कपर्दिने च व्युप्तकेशाय च
नमः सहस्राय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मी
ढुष्टमाय चेषुमते च नमो ह्रस्वाय ॥ २९ ॥ नमो ह्रस्वाय च वामनाय च नमो बृ
हते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमो ग्र्याय च प्रथमाय च नमऽआ रामः
शवे ॥ ३० ॥ नमऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नमऽऊर्म्या १४
य चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥ ३१ ॥ नमो ज्येष्ठाय च कनि

ष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्या
य च बुध्न्याय च नमः सोभ्याय ॥ ३२ ॥ नमः सोभ्याय च प्रतिसर्याय च नमो याम्या
य च क्षेम्याय च नमः श्लोक्याय चावसान्याय च नमऽउर्वर्याय च खल्याय च न
मो वन्याय ॥ ३३ ॥ नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च न
मऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्मिने ॥ ३४ ॥
नमो बिल्मिने च कवचिने च नमो वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च
नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे ॥ ३५ ॥ नमो धृष्णवे च प्रमृशाय च
नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्व
ने च ॥ ३६ ॥ नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सर

Indira Gandhi National
Centre for the Arts

रुद्र
१५

रस्याऽयचनमोनादेयायचवैशन्तायचनमःकूप्याय ३७ नमःकूप्यायचाव
ट्याऽयचनमोवीध्र्यायचातप्याऽयचनमोमेघ्यायचविद्युत्याऽयचनमोवर्ष्याय
यँनमोवात्याय ३८ नमोवात्यायचरेष्म्यायचनमोवास्तव्याऽयचवास्तुपा
यचनमःसोमायचरुद्रायचनमस्ताम्रायचारुणायचनमःशङ्गव ३९ नमः
शङ्गवेचपशुपतयेचनमऽउग्रायचभीमायचनमोऽग्रेवधायचदूरेवधायचन
मोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्योनमस्ताराय ४० नमःशम्भवाय
चमयोभवायचनमःशङ्करायचमयस्करायचनमःशिवायचशिवतरायच रामः
४१ नमःपार्य्यायचावार्य्यायचनमःप्रतरणायचोत्तरणायचनमस्तीर्थ्या १५
यचकूल्यायचनमःशष्प्यायचफेन्यायचनमःसिकत्याऽय ४२ नमः

सिकत्याऽयचप्रवाह्याऽयचनमःकिꣳशिलायचक्षयणायचनमःकपर्दिने
चपुलस्तयेचनमऽइरिण्याऽयचप्रपथ्याऽयचनमोव्रज्याय ४३ नमोव्रज्या
यचगोष्ठ्यायचनमस्तल्प्यायचगेह्यायचनमोहृदय्याऽयचनिवेष्यायचनमः
काट्यायचगह्वरेष्ठायचनमःशुष्क्याय ४४ नमःशुष्क्यायचहरित्याऽय
चनमःपांसव्याऽयचरजस्याऽयचनमोलोप्यायचोलप्याऽयचनमऽऊ
र्व्यायचसूर्व्यायचनमःपर्णाय ४५ नमःपर्णायचपर्णशदायचनमऽउ
द्गुरमाणायचाभिघ्नतेचनमऽआखिदतेचप्रखिदतेचनमऽइषुकृद्भ्योध
नुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाꣳहृदयेभ्योनमोविचिन्वत्के
भ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ४६ द्रापेऽअन्धसस्पते

Indira Gandhi National Centre for the Arts

रुद्रि ॥१८॥ दरिद्र नीललोहित ॥ आसां प्रजानामेषां पशूनां माभेर्मारो मो च नः कि
ञ्चनाममत् ॥ ४७ ॥ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ॥ य
था शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे ऽअस्मिन्ननातुरम् ॥ ४८ ॥ या ते रु
द्र शिवा तनूः शिवा विश्वाहा भेषजी ॥ शिवा रुतस्य भेषजी तया नो मृड जीवसे
॥ ४९ ॥ परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ॥ अवस्थिरा
मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥ ५० ॥ मीढुष्टम शिवतम शिवो
नः सुमना भव ॥ परमे वृक्ष ऽआयुधन्निधाय कृत्तिं वसान ऽआचर पिनाकं बि रामः
भ्रदा गहि ॥ ५१ ॥ विकिरिद्र विलोहित नमस्ते ऽअस्तु भगवः ॥ यास्ते सह १८
स्रं हेतयो ऽन्यमस्मन्निवपन्तु ताः ॥ ५२ ॥ सहस्राणि सहस्रशो बाह्वोस्तव

हेतयः ॥ तासामीशानो भगवः पराचीना मुखा कृधि ॥ ५३ ॥ असंख्याता सह
स्राणि ये रुद्रा ऽअधि भूम्याम् ॥ तेषा ॐ सहस्रयोजनेवधन्वानि तन्मसि ॥ ५४ ॥
अस्मिन्महत्यर्णवेन्तरिक्षे भवा ऽअधि ॥ तेषा ॐ सहस्रयोजनेवधन्वा
नि तन्मसि ॥ ५५ ॥ नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा ऽउपश्रिताः ॥ तेषा ॐ
सहस्रयोजनेवधन्वानि तन्मसि ॥ ५६ ॥ नीलग्रीवाः शितिकण्ठाः शर्वा ऽअ
धः क्षमाचराः ॥ तेषा ॐ सहस्रयोजनेवधन्वानि तन्मसि ॥ ५७ ॥ ये वृक्षेषु
शष्पिञ्जरा नीलग्रीवा विलोहिताः ॥ तेषा ॐ सहस्रयोजनेवधन्वानि तन्म
सि ॥ ५८ ॥ ये भूतानामधिपतयो विशिखासः कपर्दिनः ॥ तेषा ॐ सहस्रयो
जनेवधन्वानि तन्मसि ॥ ५९ ॥ ये पथां पथिरक्षय ऽऐलबृदा ऽआयुर्युधः

Indira Gandhi National
Centre for the Arts

रुद्रि
१७ तेषा ७७ सहस्रयोजनेऽव धन्वानि तन्मसि ६० ये तीर्थानि प्रचरन्ति सृका
हस्ता निषङ्गिणः तेषा ७७ सहस्रयोजनेऽव धन्वानि तन्मसि ६१ येन्नेषु वि
विध्यन्ति पात्रेषु पिबतो जनान् तेषा ७७ सहस्रयोजनेऽव धन्वानि तन्मसि ६२
यऽएतावन्तश्च भूया ७७ सश्च दिशो रुद्रा वितस्थिरे तेषा ७७ सहस्रयोज
नेऽव धन्वानि तन्मसि ६३ नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः ते
भ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्यो नमो
ऽअस्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ६४ रामः
नमोस्तु रुद्रेभ्यो येन्तरिक्षे येषां वातऽइषवः तेभ्यो दश प्राचीर्दश दक्षिणा १७
दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु

न्तु ते नो २

दशोर्ध्वाः २

ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ६५ नमोस्तु रुद्रेभ्यो ये पृथि
व्यां येषामन्नमिषवः तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः
तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषां
ञ्जम्भे दध्मः ६६ पुनः नमस्ते षोडशाः पठेत् १६ एष ते रुद्र भागः स
ह स्वस्राम्बिकया तञ्जुषस्व स्वाहैष ते रुद्र भाग आखुस्ते पशुः १ अव रुद्रम
दीमह्यव देवं त्र्यम्बकम् यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा
नो व्यवसाययात् २ नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः बाहुभ्या
मुत ते नमः १ या ते रुद्र शिवा तनूरघोरापापकाशिनी तया नस्तन्वा शन्तम
या गिरिशन्ताभिचाकशीहि २ न तं विदाथ य इमा जजानान्यद्युष्माक

Indira Gandhi National
Centre for the Arts

रुद्रि मन्तरम्बभूव ॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ १ ॥
२० विश्वकर्म्मा ह्यजनिष्ट देवऽआदिद्गन्धर्वोऽअभवद्द्वितीयः ॥ तृतीयः पिता
जनितौषधीनामपाङ्गर्ब्भं व्यदधात्पुरुत्रा ॥ २ ॥ मीढुष्टम शिवतम शिवो नः सु
मना भव । परमे वृक्षऽआयुधन्निधाय कृत्तिं वसानऽआचर पिनाकम्बिभ्रद
गहि ॥ १ ॥ विकिरिद्र विलोहित नमस्तेऽअस्तु भगवः । यास्ते सहस्रं हेतयो
न्यमस्मन्निवपन्तु ताः ॥ २ ॥ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासा
मीशानो भगवः पराचीना मुखा कृधि ॥ ३ ॥ असङ्ख्याता सहस्राणि ये रुद्रा रामः
ऽअधि भूम्याम् । तेषां सहस्रयोजनेव धन्वानि तन्मसि ॥ ४ ॥ वयं सोम २०
व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ १ ॥ एष ते रुद्र भागः

सह स्वस्राम्बिकया तं जुषस्व स्वाहा एष ते रुद्र भागऽआखुस्ते पशुः ॥ २ ॥ अ
व रुद्रमदीमह्यव देवं त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयस
स्करद्यथा नो व्यवसाययात् ॥ ३ ॥ भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भे
षजम् । सुखम्मेषाय मेष्यै ॥ ४ ॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्
उर्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् । त्र्यम्बकं यजामहे सुग
न्धिम्पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥ ५ ॥ एतत्ते रु
द्रावसन्तेन परो मूजवतोतीहि । अवततधन्वा पिनाकावसः कृत्तिवासाऽ
अहिंसन्नः शिवोतीहि ॥ ६ ॥ त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥ ७ ॥ शिवो नामासि स्वधितिस्ते

Indira Gandhi National
Centre for the Arts

रुद्रि १९ पितानमर्त्र ऽ आरत्नुमामाहिꣳसीः ॥ निवर्तयाम्यायुषेन्नाद्याय प्रजननाय
रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ ८ ॥ अथ शान्तिपाठः ॥ हरिः ॐ
उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वांश्चाभियुग्वा च विक्षिपः
स्वाहा ॥ १ ॥ अग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भ
वं यक्ना । शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तः पर्शव्येनोग्रं दे
वं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥ २ ॥ उग्रं लोहितेन मित्रꣳ सौ
व्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान् प्रमुदा । भवस्य क रामः
ण्ठ्यꣳ रुद्रस्यान्तः पार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् १९
॥ ३ ॥ वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च

मे स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे
यज्ञेन कल्पन्ताम् ॥ १ ॥ प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तञ्च
म ऽ आधीतञ्च मे वाक् च मे मनश्च मे चक्षुश्च मे श्रोत्रञ्च मे दक्षश्च मे बल
ञ्च मे यज्ञेन कल्पन्ताम् ॥ २ ॥ ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राण
म्प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये । वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥ य
न्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु
शन्नो भवतु भुवनस्य यस्पतिः ॥ २ ॥ भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो दे
वस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ३ ॥ अग्निर्देवता वातो देवता सू
र्यो देवता चन्द्रमा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ १ ॥ वसवः
वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता १

Indira Gandhi National
Centre for the Arts

रुद्र पृथिव्याम्प्सु पयो ऽग्नौ यवीसु पयो दिव्यन्तरिक्षे पयोधाः पयस्वतीः प्रदिशः स
२० न्तु मह्यम् २ विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णो
र्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ३ नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्व
र्चिषे अन्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यं शिवो भव १ न
मस्ते ऽअस्तु विद्युते नमस्ते स्तनयित्नवे नमस्ते भगवन्नस्तु यतः स्वः
समीहसे २ यतो यतः समीहसे ततो नो ऽअभयं कुरु शन्नः कुरु प्रजाभ्यो
भयन्नः पशुभ्यः ३ स्वस्ति न ऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः शनः
स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु १ विश्वा २०
नि देव सवितर्दुरितानि परासुव यद्भद्रं तन्न ऽआसुव १ ईशावास्यमि

दं सर्वं यत्किञ्च जगत्यां जगत् तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्वि
द्धनम् १ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवन्त्वयि नान्यथेतो
ऽस्ति न कर्म लिप्यते नरे २ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरा
पः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शा
न्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि १ तच्चक्षुर्देवहितं
पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम
शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः
शतात् १ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः यथा
शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे ऽअस्मिन्ननातुरम् १ नमः

रुद्रि ॥२१॥ शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च
शिवतराय च ॥१॥ हिरण्मयेन पात्रेण सत्यस्यापिहितम्मुखम् । योसावादि
त्ये पुरुषः सोसावहम् ॥१॥ इति रुद्राभिषेकमन्त्राः ॥ अनन्तु ॥ शिव शिव
रुद्रि आवृत्ति ११ लघुरुद्रि १२१ महारुद्रि आवृत्ति १३३१ अतिरुद्रि १४६४
ॐ महादेवाय विद्महे रुद्रमूर्तये धीमहि तन्नो शिवः प्रचोदयात् ॥१॥ मह
रुद्रि १३३१ जप २६६ नमः शिवाय पायस तिलजो होम १०८ नमः शिवाय
स्वाहा तर्पण २७ शिवाय शिवं तर्पयामि मार्जन ३ नमो यमव मार्जया रामः
मि ॥ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः ॥२१॥
शिवाय च शिवतराय च ॥१॥ शिवाय नमः ॥ इति सम्वत् १८२९ सालमि

रुद्रि ॥२२॥ ति कार्त्तिक शुदि ६ रोज ४ का पूर्णा लिखितमिदं पुस्तकम् शुभम्भूयात् ॥ रामः
वज्र तुराङ महाकाय वज्र तुराङ म[illegible] वत्त ॥ ह्वा[illegible] तुराङ न भूपिं [illegible] महाज्वर ॥१॥

रामः २२

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts